దైవరాతీయ

మన ఆవర్తనము

॥ ई ॐ श्रीः ॥

॥ भद्रं नो अपि वातय मनः ॥

॥ मन आवर्तनम् ॥

" पराणि चत्वारि सूक्तानि, उक्ता ऋषयो द्वैपदं त्वत्र मण्डले ॥ सर्वानुक्रम सू

" अग्ने त्वं गौपायना लौपायना वा बन्धुः सुबन्धुः श्रुतबन्धुः विप्रबन्धुश्च
एकर्चा द्वैपदा " सर्वानुक्रमसूत्रम् ॥ (ऋग्. मं. ५।२४।१-४)

॥ विनियोग प्रयोगः ॥

" अग्ने त्वं न इति चतसृणां गौपायना लौपायना वा बन्धुः सुबन्धुः श्रुतबन्धुः
विप्रबन्धुश्चैकर्चा ऋषयः। अग्निर्देवता। द्विपदा विराट् छन्दः। अग्न्युपस्थाने
विनियोगः ॥

" अग्ने त्वं नो अन्तम उत त्राता शिवो भवा वरूथ्यः ॥ १ ॥
" वसुरग्निर्वसुश्रवा अच्छा नक्षि द्युमत्तमं रयिं दाः ॥ २ ॥
" स नो बोधि श्रुधी हवमुरुष्या णो अघायतः समस्मात् ॥ ३ ॥
" तं त्वा शोचिष्ठ दीदिवः सुम्नाय नूनमीमहे सखिभ्यः ॥ ४ ॥

॥ गौपायनः ऋषिः [illegible] ॥

" [illegible] ऋषि [illegible] शानाग्निः [illegible]
[illegible] ब्रह्मात्म [illegible]
गोपा [illegible] चन्द्रवर्ण [illegible]
त्राता [illegible] ब्रह्मा स गौपायनः ॥ १ ॥

॥ गौपायनातीति प्रचोतनतमः स्वान्तः स गौपायनः
[illegible] प्रति यन्ति [illegible] ॥
[illegible] स लौपायनः
[illegible] ॥ २ ॥

॥ अथ: [illegible] नाम्नश्च औपगवस्य [illegible] पालकः ॥
गोपायनः तदपि पठितः सम्बोधनः इन्द्रः ॥

[illegible] नाम्न उदितात् औपगश्च तत्पालकः
[illegible] पुरोहिता गोपायनाः ॥
[illegible] गोपायनः [illegible]
[illegible] प्रति [illegible] संश्रिताः ॥ ३ ॥

आसिसंक्षेपे ऋक्मन्त्राणां भावतः ॥

॥ तिस्रो वाच ईरयति प्र वह्निर्ऋतस्य धीतिं ब्रह्मणो मनीषाम् ॥
गावो यन्ति गोपतिं पृच्छमानाः सोमं यन्ति मतयो वावशानाः ॥

॥ सोमं गावो धेनवो वावशानाः सोमं विप्रा मतिभिः पृच्छमानाः ॥
सोमः सुतः पूयते अज्यमानः सोमे अर्कास्त्रिष्टुभः सं नवन्ते ॥
(पराशरः शाक्त्यः) (ऋ.सं. ९।९७।३४-३५)

[illegible] प्रतियान्ति गोपतिं [illegible] पृच्छमानाः [illegible]
सोमं यान्ति [illegible] प्रगाः ॥
[illegible]
[illegible] सोमं प्रयान्ति [illegible] ॥ ४ ॥

॥ "बन्धुः सुबन्धुः श्रुतबन्धुः विप्रबन्धुः" इति प्रथिता [illegible] ॥

[illegible] गोपायन [illegible]
[illegible] बन्धु [illegible] सुबन्धुः परः ॥
[illegible] श्रुतबन्धु [illegible]
[illegible] विप्रबन्धु [illegible] ॥ ५ ॥

॥ सूक्तानां चतुर्णां [illegible] ॥

॥ [illegible] गोपायना [illegible] बन्धुः श्रुतबन्धुर्विप्रबन्धुश्च
[illegible] इति ॥ [illegible]

"चत्वारोऽत्र गणान्विताश्च ऋषयो गौपायना बान्धवाः
बन्धुश्चाथ सुबन्धुरत्र सुविदः सङ्कीर्तहृद्बान्धवाः
श्रुत्यर्थे श्रुतबन्धुरित्यभिधया सिद्धः परोक्षार्थकः
ज्ञातार्थेऽपि तु विप्रबन्धुरुदितो लौपायनाः साधवः ।। ६ ।।

।। बन्धुप्रभृतीनां चतुर्णां एकर्चानामृषीणां ऋङ्मन्त्रदर्शनम् ।।

"चत्वारोऽपि च ते तपस्सु निरताः धीयोगसख्यान्विताः
ऋङ्मन्त्रं ददृशुः समाधिनिरताः प्रत्यग्दृशाऽन्वास्थिताः ।।
एकर्चाः प्रथिताः स्वसंविदुदितास्ते ब्रह्मवर्चस्विनः
मन्त्रास्ते द्विपदाश्च तत्र उदिताः सिद्धा विराट्छन्दसः ।। ७ ।।

"अग्ने त्वं गौपायना लौपायना वा बन्धुः सुबन्धुः श्रुतबन्धुर्विप्रबन्धुश्च एकर्चा द्वैपदम्" इति सर्वानुक्रमसूत्रम् (ऋग्. मं. ५।२४।१-४)

।। तानि चत्वारि ऋक्प्रतीकानि ।।

"अग्ने त्वं न" इत्यृग् बन्धुगदिता छन्दस्वती वाङ्मुखा
सोऽग्निः सन् "वसुरग्नि"रित्यनुनुतः पश्चात् सुबन्धोर्मुखात् "
श्रोताऽन्तः श्रुतबन्धुरेनदृ "स नो बोधि श्रुधी[illegible]
संवेदं हृदि विप्रबन्धुविदितं "तं त्वा" इति मन्त्रोदितम् ।। ८ ।।

।। (१) प्रथमा ऋक् — बन्धुर्ऋषिः ।।

"अग्ने त्वं नो अन्तम उत त्राता शिवो भवा वरूथ्यः ।। १ ।।

"अग्ने त्वं निकटितोऽन्तमः स्वरतमः सन् पूर्णनिर्वृत्तः
त्राता प्राणबलप्रदो रसतमः सर्वान्तरः सन्तमः
ज्येष्ठश्चात्र शिवो भव प्रियतमः श्रेयान् वरिष्ठश्च नः
श्रेष्ठः सर्वसुखार्थिनां परतमः सुदेहि वाञ्छां ऽस्मनः ।। ९ ।।

॥ द्वितीया ऋक् ॥ "सुबन्धुः" ऋषिः ॥

" वसुरग्निर्वसुश्रवा अच्छा नक्षि द्युमत्तमं रयिं दाः ॥ २ ॥

" अग्निः सोऽत्र वसुश्रवा अपि वसुः प्राणात्मसञ्चेतनः
सोऽध्यात्ममन्यनुलक्ष्य तं प्रति लयं योगेन चित्सत्तनः ॥
ज्योतिश्चित्किरणं द्युमत्तममिमं स्वान्तर्विभूतिप्रदं
आप्नोति प्रणिधानतः परतमं तं पारमैश्वर्यदम् ॥ १० ॥

॥ तृतीया ऋक् ॥ "श्रुतबन्धुः" ऋषिः ॥

" स नो बोधि श्रुधी हवमुरुष्या णो अघायतः समस्मात् ॥ ३ ॥

" स त्वं बोधय हवं स्तुतं शृणु च नः शम्बोधनाभ्यर्दितं
पापेच्छोरघदायतो निशमनाद् दुःखात्समस्मादितां ॥
तं दूरीकुरु सर्वतो दुरुदितां दुर्वासनादन्तरं
तद्वाराच्च सदा दुरुक्तवचनात् संरक्ष सोऽस्मान् त्वरम् ॥ ११ ॥

॥ चतुर्थी ऋक् ॥ "विप्रबन्धुः" ऋषिः ॥

" तं त्वा शोचिष्ठ दीदिवः सुम्नाय नूनमीमहे सखिभ्यः ॥ ४ ॥

" तं त्वा दीप्तियुतं महाद्युतिदितं दिव्यं सुतेजोऽन्वितं
विश्वेषां जगतां सतां तनुभृतां स्वान्तर्दिशोदितम् ॥
विश्वासिन् परमं प्रकाशकचितिं सौरव्याय याचामहे
ज्ञानोद्दाय सखिभ्य आन्तरतमां सर्वेन्द्रियै रीमहे ॥ १२ ॥

॥ स्तुतिवाचि यदिदं सत्यं वस्तुतत्त्वम् ॥

" मन्त्रेषु प्रतिसंस्तुतिं व्यापिदितं सद्वस्तुतत्त्वं हितं
मन्त्रार्थान्वयतश्च संविदुदितं सत्यं सुधीसंहितम् ॥
सूक्तार्थादितिहासरूपकयुतं सद्बोधकं संस्कृतं
वेदार्थानुगतं ह्यदो दितिमतां प्राच्यां हृदाऽभ्युद्दितम् ॥ १३ ॥

॥ वैदिकेषु मन्त्रेषु शब्देषु च साङ्केतिकभाषासत्त्वम् ॥

" यत् साङ्केतिकभाषयाऽनुकृतया सादर्शनेनोल्लिखितं
यत् साक्षादपरोक्षतश्च परतस्तत्त्वार्थान्वितम् ॥
वेदार्थेषु परं रहस्यगपरं विज्ञानसत्त्वोदयात्
विद्यात् तत् सकलं समन्वयपरं गुप्तेदेन संवेदयेत् ॥ १४ ॥

॥ बन्धुप्रभृतीनामपि तत् साङ्केतिकार्थतत्त्वम् ॥

" यद् बन्धुप्रभृतीन् भावचनं स्वार्थेयसदर्शकं
तेषोऽर्थे परवस्तुदर्शकपरं गुप्तार्थसम्बोधकम् ॥
तत्त्वार्थादितिहाससरूपकपरं सर्वार्थविद् कल्पितं
दिव्यं सूक्तचतुष्टयं समुदितं तन् "मा प्रगामेति" वै ॥ १५ ॥

॥ एतानि चत्वारि सूक्तानि उक्ता ऋषयो द्वैपदे दशमे मण्डले, (५। )
॥ अथ ऐक्ष्वाको राजाऽसमातिर्गौपायनान् बन्धवादीन् पुरोहितान् त्यक्त्वा,
... [illegible] मायाविनौ श्रेष्ठतमौ मत्वा पुरो दधौ, तस्मिन् क्रुद्धा अभिचेरुः,
अथ तौ मायाविनौ सुबन्धोः प्राणानाचिक्षिपतुः, अथास्य भ्रातरस्त्रयः
... [illegible] बद्धं सामत्रं स्वस्त्ययनं जप्त्वा, "यत्" इति द्वादशर्चानुष्टुभं
... [illegible] जेपुः ॥ (ऋक् सर्वानुक्रमसूत्रम्, ऋ. सं. मं. १०। ५६.)

" ऐक्ष्वाकोऽसमातिरसा हि पुरा राजा रथप्रोष्ठनामक
त्यक्त्वा सोऽथ पुरोहितान् श्रान्ततुरो बन्धुप्रमुख्यान् ऋषीन् ॥
अन्यौ श्रेष्ठतमौ विभाव्य सहसा स्वार्थेन मायाविनौ
कृत्योगेन पुरो दधौ सुमनसा गुप्तं प्रणामस्वामिनौ ॥ १६ ॥

॥ बन्धुप्रभृतिभिः राजानं प्रति अपचारकृत्याचरणम् ॥
॥ मायाविभ्यां सुबन्धोः प्राणापहरणम् ॥

" ते बन्धुप्रमुखास्तदा विमनसः क्रुद्धाः समाभाव्य सो
तं राजानमथाभिचेरुरिति वै द्वेषेण मायाविनौ ॥
आजाकुर्वभिचारदुष्कृतितः प्राणान् सुबन्धोस्ततः
बन्धवादयः प्रति दुःखिताः समभवन् बन्धास्ते त्रयः ॥ १७ ॥

॥ सुबन्धोर्जीवितार्थं बन्धुप्रभृतीनां पश्चात् स्मरणं गायनाम्
पश्चात् मन उत्पत्तिनागमनम् ॥

१८ " गायत्रेण सकर्ष सूक्त नवानां तन् " मा प्र गामेति मे
ऋचा स्वस्त्ययनं तथा प्रथाति स्तोत्रां पुनं शरणदम् ॥
" यत् ते " मन्त्रपरं हि सूक्तागमपरं तद् द्वादशर्चं परं
तत् से कृपु स्वर्दिनस्य मनसः स्वावर्तनं शम्प्रदम् ॥ १८ ॥

॥ तत्र ऐतिहासिकदृष्ट्या मरणं सुबन्धोर्मनसः आगतिमार्
तस्मिन् तस्य पुनर्जीवनीकरणम् ॥

१९ " तत्रादौ विदितं सुबन्धुमरणं माल्यात् कृते मोरणं
तन्त्राशादिति हासतोऽनुकरणं मायाविनोः कारणम् ॥
संसाध्यं मनसो यमस्य सदना दावर्तनं दूरपरं
सांसिद्धं श्रुति तत् सजीवकरणं स्नित्यं सुबन्धोः परम् ॥ १९ ॥

॥ उपदेशदृष्ट्या धीयोग साधनादि प्रक्रियादि परिकल्पना ॥

२० " प्रत्यक्षात् प्रतिशिक्षणार्थमुचितं तत्साधनावर्तनं
प्राणस्यापि च तद्गतस्य मनसो योगात् समावर्तनम् ॥
प्रत्यगात्मनि शुद्धसत्त्वहृदये प्रज्ञाप्रतिष्ठापनं
प्रज्ञात्मप्रतिसंविदः समुदये प्रज्ञानसत्त्वागमम् ॥ २० ॥

॥ बन्धु सुबन्धु शब्दयोः प्राणमनः सत्त्वयोः सङ्केतार्थपरता ॥

२१ बन्धुः प्राणपरः सचेतनपरो हृद् बन्धनं सत्परं
बन्धोरादितयो स्वयोः सदसतोः सद्भावैकास्पदम् ॥
प्राणेनात्र च संहितः स मनसा सूक्तः सुबन्धुः परः
प्राज्ञेन्द्रं सुचिदम्बरस्य सुमनः सत्त्वेन योगोऽन्तरः ॥ २१ ॥

॥ श्रुतबन्धु शब्दस्य आन्तरः सङ्केतार्थः ॥

२२ " श्रोत्रात्मा श्रुतबन्धुरत्र विदितः शब्दानुबन्धोदितः
नेत्रात्मा इति दर्शने समुदितो नामानुरूपोऽन्वितः ॥
श्रोत्रादित्य गुणान्वयो समुदित स्तद्वृत्तितन्मात्रया
सोऽयं श्रावणके समासमनुदितो धामादि सद्दृश्यया ॥ २२ ॥

॥ विप्रबन्धुशब्दस्य सङ्केतार्थः ॥

"स्नानाप्तो हृदि विप्रबन्धुरुदगाद् व्याप्ता तदर्शिप्रभा
ज्ञानं वाङ्मुखतोऽत्र वाचकपदाद् विप्राप्तशब्दात्त्वया ॥
आग्नेयं तदिदं भवेत् समपदात् तत्सम्भराऽऽयोतिषं
सैन्द्राग्नं चितिदैवतावाचकपरं हृद्योगसंज्ञान्वितम् ॥ २३ ॥

॥ धीयोगेन विप्रबन्धुतासिद्धिः ॥

"ध्यानं स्वात्मनि सर्वधीन्द्रियपरं हृद्योगसत्साधनं
धीनां योगपदं प्रपद्य पुराणः स्वान्तः प्रसादस्थितम् ॥
विप्राणामिह बन्धुरात्मविदुषां विज्ञानिनामन्तरे
विप्रेन्द्रोऽभ्युदियाय संविदुदये विश्वादिविद्यालये ॥ २४ ॥

॥ मन आवर्तने प्रथमं सूक्तम् ॥

"मा प्र गाम पथो वयम्" इति ॥ (ऋक्० मं० १०। ५७। १-६)

॥ बन्धुः श्रुतबन्धुः विप्रबन्धुश्च ते गौपायनाः ऋषयः ॥

॥ विश्वे देवाः देवता। गायत्री छन्दः ॥

"अथास्य भ्रातरस्त्रयो "मा प्र गामेति" षट्कं गायत्रं स्वसमयनं ज्ञात्वा सत्र इति द्वादशर्चं मानुष्टुभं मन आवर्तनं जेपुः" इति सर्वानुक्रमसूत्रम् ॥

(१) ॥ अथ प्रथमा ऋक् ॥

"मा प्र गाम पथो वयं मा यज्ञादिन्द्र सोमिनः। मान्तः स्थुर्नो अरातयः ॥

"इन्द्राग्निम् भुवने शरीरसदने हृद्योगविज्ञानिनः
चन्द्रगो मनसोऽन्तरे हृदयगो यज्ञार्थिनः सोमिनः ॥
मा गच्छाम वयं निजादिह पथो यज्ञात् स्वधर्मार्थिनः
मारमन्तःस्वरिपुर्यथा सोऽपि शपथाद् यज्ञादितिवेदिनः ॥ २५ ॥

(२) ॥ द्वितीया ऋक् ॥

"यो यज्ञस्य प्रसाधनस्तन्तुर्देवेष्वाततः। तमाहुतं नशीमहि ॥ २ ॥

" सो यज्ञस्य सुसाधनः सुकरणो देवेषु तन्तुस्ततः
देवानां च नृणां च बन्धनगुणो दिव्यस्वरूपात्ततः ।।
योगादत्र मिथः प्रशस्तिकरणो युक्तो द्वयोः संस्तुतः
सोऽयं नाहुत यज्ञयाग हृदयाद् आहूत आन्तः स्वतः ।। २६ ।।

(३) ।। तृतीया ऋक् ।।

" मनो न्वा हुवामहे नाराशंसेन सोमेन । पितॄणां च मन्मभिः ।। ३ ।।

" यज्ञेऽस्मिन् हि मनोऽनुयुक्तवचसा सोमेन सम्पादिना
नाराशंसगुणेन सौम्यमनसा सत्येन सर्वात्मना ।।
ध्यानेनात्मनि धारणेन तपसा धीरत्वाऽऽह्वयामो वयं
ध्यातॄणां पितॄणां प्रसादनवतां ध्येयैकतत्त्वान्वयम् ।। २७ ।।

(४) ।। चतुर्थी ऋक् ।।

" आ त एतु मनः पुनः क्रत्वे दक्षाय जीवसे । ज्योक् च सूर्यं दृशे ।। ४ ।।

" आत्माभेतु मनः पुनस्तव परं यज्ञाय योगायने
कृत्यै तत् क्रतवे बलाय महसे ज्ञानाय सज्जीवने ।।
द्रष्टुं सूर्यमपि चिराय तपसे ध्यानाय धीसङ्गमे
साक्षात्कारकृते परे समरसे स्वाध्यात्मनिष्ठागमे ।। २८ ।।

(५) ।। पञ्चमी ऋक् ।।

" पुनर्नः पितरो मनो ददातु दैव्यो जनः । जीवं व्रातं सचेमहि ।। ५ ।।

" तेऽस्माकं पितरो मनो द्रुतमिह पुनर्दद्यानु सौख्याशाः
सद्दानेन ददातु दिव्यसदनो दिव्येन दैव्यो जनः ।।
जीवं व्रातमगुं स्वयूथमुदितं दिव्यात्मसत्त्वान्वितं
जीवात्मानमितो निबद्धहृदितं सच्चासुमः स्वान्वितम् ।। २९ ।।

(६) ॥ षष्ठी ऋक् ॥

" वयं सोम व्रते तव मनस्तनूषु बिभ्रतः । प्रजावन्तः सचेमहि ॥६॥

" सोमास्मिन् हि तव व्रते निजमनः सन्धारयन्तो वयं
सौम्यात्मन्यपि सत्तनूषु नयनं सम्बिभ्रतः स्वान्तयम् ॥
स्वान्तर्धारणया सनातनाचारया धीत्या परीक्षाश्रया
सद्भावृया प्रजया ऽऽ स्ववृत्तिपरया युञ्ज्महे सत्रया ॥३०॥

" स्वस्त्ययनं जप्त्वा "- स्वस्त्ययनजापनम् ॥

" सत्यं स्वस्त्ययनं प्रसादनयनं सत्यैकतत्त्वायनं
स्वान्तः स्वात्मनि सम्प्रसादसदने प्रज्ञाप्रतिष्ठापनम् ॥
प्रत्यक्षि प्रणिधानसिद्धिकरणं सन्मानसोत्थापनं
प्रत्येयं परमं समाधिकरणं प्राज्ञात्मनि स्थापनम् ॥३१॥

॥ अज्ञानादीनि मनःसमाधिसाधनानि ॥
॥ विज्ञानादिकराणि परमात्मवस्तुचित्स्वराणि वेदमन्त्राक्षराणि ॥

" स्वज्ञाने सदुपासनादिकरणे यज्ञादिसत्साधने
स्वाध्यायाभ्यसने ऽन्तरैस्थिरकरणे ध्यात्मयोगायने ॥
विज्ञाने ऽप्यनुभावसत्त्वनयनं सत्यामृतत्वोत्तरं
विज्ञेयं परवस्तुतत्त्ववचनं तद् वेदमन्त्राक्षरम् ॥३२॥

॥ इति प्रथमा कला सम्पूर्णा ॥(१)

॥ प्रथमकलोपसंहारः ॥

" वन्दानः परमेश्वरः स्वमन्त्रदर्शनात् परं
मा प्रमाद सत्यधादिति स्वमापु रास्पदम् ॥
दैवतेन्द्र सूक्तकात् [illegible] कात् [illegible]
दैवरातला [illegible] प्रगीत [illegible] दार्थ तत्त्वकम् ॥ (१)